# संस्कृतवार्ता:

दिनाङ्क : 25/08/2025 सायम् - 06:20

## आदौ-मुख्यवार्ता:

- भारतफिजीदेशाभ्याम् आतङ्कवादं विरुध्य असहिष्णुतायाः नीतिः पुनः स्मारिता सहैव उभयदेशौ अद्य नवदिल्ल्यां स्वास्थ्यं, मानकीकरणं, क्षमतानिर्माणञ्च समेत्य नवसन्धि-ज्ञापनपत्रेषु हस्ताक्षरं कृतवन्तौ ।
- प्रधानमन्त्री नरेन्द्रमोदी अद्य अहमदाबादनगरे चतुश्शताधिक-पञ्च- सहस्त्रकोटिरुप्यकाणां विकासपरियोजनानां शुभारम्भं करिष्यति।
- गृहमन्त्री अमितशाहः संविधानस्य त्रिंशदधिक-शततमस्य संशोधन- विधेयकस्य विरोधे विपक्षिदलमालक्ष्य वाक्शरं विमोचितवान्।
- भारत-ऋतु-विभागेन अद्य जम्मू-कश्मीर्, हिमाचलप्रदेश, पञ्जाब् इत्येतेषु राज्येषु अतिवृष्टेः रेड्-अलर्ट् इति रक्त-वर्णीया संचेतना प्रसारितास्ति।
- राष्ट्रमण्डल-भारोत्तोलन-प्रतिस्पर्धायां टोक्यो-ओलिम्पिक्-रजतपदक-विजेत्री मीराबाईचानु इत्येषा अद्य महिलानाम् अष्टचत्त्वारिंशत्-किलोग्रामवर्गे स्वर्णपदकं विजितवती।

---

## भारत-फिजीसन्धिः

भारत-फिजीदेशाभ्यां अद्य नवदिल्ल्यां स्वास्थ्यं, मानकीकरणं, क्षमतानिर्माणञ्च समेत्य नवसन्धि-ज्ञापनपत्रेषु हस्ताक्षरं कृतम् । प्रधानमन्त्रिणा नरेन्द्रमोदिना अद्य नवदिल्ल्याः हैदराबादभवने फिजीदेशस्य प्रधानमन्त्रिणा सितिवेनी-राबुका इत्यमुना सह शिष्टमण्डल-स्तरा वार्ता साधिता। स्वकीयेन फिजी-समकक्षेण सिटिवेनी-लिगामामादा-राबुका इत्यमुना सह प्रतिनिधि-मण्डलस्तरीय-वार्तायाः अनन्तरं श्रीमोदिना वार्ताहराः सम्बोधयता प्रोक्तं यत् फिजीदेशस्य राजधान्यां सुवायां शतशय्यायुतः अतिविशिष्टः चिकित्सालयः स्थापयिष्यते। सः

प्रोक्तवान् यत् जनौषधिकेन्द्राणां स्थापनेन सह रक्तशोधनान्वितिः, सामुद्रिक-चिकित्सावाहन-सेवाश्चापि उपालम्भिष्यते। अनेन उत्कृष्टगुणयुक्ताः औषधयः सर्वसुलभाः भविष्यन्ति।

श्रीमोदी सबलं प्राख्यापयत् यत् उभावपि देशौ साइबरसुरक्षाक्षेत्रे डाटाक्षेत्रे च विचारविनिमयाय सज्जौ स्तः। उभाभ्यामपि देशाभ्यां सुरक्षाक्षेत्रे परस्परसहयोगस्य दृढीकरणार्थं निर्णयो कृतः। सम्बन्धेऽस्मिन् काचित् कार्ययोजनापि निर्मितास्ति ।

श्रीमोदी प्रोक्तवान् यत् जलवायुपरिवर्तनं फिजीदेशाय गभीरसङ्कटमस्ति। सन्दर्भेऽस्मिन् उभयदेशौ नवीकरणीयोर्जायाम् सहकार्यं कुरुतः। अवसरेऽस्मिन् श्रीराबुका उक्तवान् यत् अद्य तस्य प्रतिनिमण्डलेन यद्दृष्टं, यच्छ्रुतं तथैव विभिन्न-सन्धिषु हस्ताक्षरमाध्यमेन यत्किमपि अनुभूतं तत्सर्वमपि कल्पनातीतं आसीत् सहैव ते अतीवप्रभाविताः जाताः। तेन इदमपि प्रोक्तं यत् भारत-फिजीदेशौ शान्त्यै, स्थिरतायै, विकासार्थञ्च ऐक्येन स्थितौ वर्तेते।

---------------------------------------------

**प्रधानमन्त्री-गुजरातयात्रा**

प्रधानमन्त्री नरेन्द्रमोदी अद्य अहमदाबादनगरे चतुश्शताधिक-पञ्चसहस्रकोटिरुप्यकाणां विकासपरियोजनानां शुभारम्भं करिष्यति। गुजरातस्य द्विदिवसीययात्रावधौ असौ उत्तर-गुजरात-विज-कंपनी-लिमिटेड इत्यस्यान्तर्गतं अहमदाबाद-मेहसाणा-गान्धीनगरेषु च एकसहस्र-कोटिरुप्यतो ऽप्यधिकानां विद्युत्-वितरणपरियोजनानां उद्घाटनमपि विधास्यति। सम्प्रति सः अहमदाबादे भव्यपथ-प्रदर्शनानन्तरं खोडलधाम-उद्याने सभां सम्बोधयिष्यति।

---------------------------------------------

**गृहमन्त्री-साक्षात्कारः**

गृहमन्त्री अमितशाहः संविधानस्य त्रिंशदधिक-शततमस्य संशोधनविधेयकस्य विरोधे विपक्षिदलमालक्ष्य वाक्शरं विमोचितवान्। एकस्यै समाचारसंस्थायै प्रदत्ते साक्षात्कारे श्रीशाहेन आक्षिप्तं यत् विपक्षिनेतारः कारावासे बन्धत्वादपि सर्वकारनिर्माणाय प्रचालनाय च प्रयतन्ते। तेन विधेयकं विरुध्य विपक्षिणां विरोधः अलोकतान्त्रिकत्वेन प्रतिपादितः।

श्रीशाहेन कथितं यत् प्रधानमन्त्रिणा नरेन्द्रमोदिना अस्य विधेयकस्यान्तर्गतं प्रधानमन्त्रीपदस्य आनयनाय बलं प्रदत्तमासीत्।

-----------------------------------------------

## उत्तरप्रदेश-दुर्घटना

उत्तरप्रदेशस्य बुलन्दशहर-नगरे चतुःत्रिंशत्तमे राष्ट्रिय-राजमार्गे रात्रौ घटितायां मार्गदुर्घटनायां, द्वे महिले, एकं बालकं च समेत्य न्यूनातिन्यूनं नव जनाः मृताः, अन्ये च पञ्चचत्वारिंशत्-जनाः व्रणिताः अभवन्। घाटल-ग्रामस्य समीपे एषा घटना तदाभवत् यदा श्रद्धालुभिः पूरितयानस्य एकेन ट्रैक्टर-यानेन सह संघातो जातः। गोगाजीवर्यस्य भक्ताः उत्तर प्रदेशस्य कासगंजतः राजस्थानस्य गोगामेडी-नगरं प्रति गच्छन्तः आसन्। बुलन्दशहरनगरस्य वरिष्ठारक्षि-अधीक्षकः दिनेशकुमारसिङ्घः अवदत् यत् गतरात्रौ अलीगढसीमायां एन्. एच्. चतुःत्रिंशत् इत्यत्र दुर्घटना अभवत्। कासगञ्ज्-जनपदात् राजस्थानं प्रति प्रायः षष्ठितः एकषष्ठिः जनाः ट्रैक्टर्-यानेन यात्रां कुर्वन्तः आसन्।

-----------------------------------------------

## ऋतु-विभागः

भारत-ऋतु-विभागेन अद्य जम्मू-कश्मीर्, हिमाचलप्रदेश, पञ्जाब् इत्येतेषु राज्येषु अतिवृष्टेः रेड्-अलर्ट् इति रक्त-वर्णीया संचेतना प्रसारितास्ति। विभागस्य अनुसारं, गुजरातस्य, राजस्थानस्य, उत्तराखण्डस्य च पृथक्-पृथक् स्थानेषु श्वः यावत् प्रचण्डतः अतिवृष्टिः भवितुम् अर्हति। आकाशवाण्या सह विशिष्ट-वार्तालापे, ऋतुविभागस्य वरिष्ठः वैज्ञानिकः डा. आर्. के. जेनामणिः अवदत् यत् अग्रिमेषु अष्टचत्वारिंशत् होरासु बङ्गाल-खात्याः तटे न्यून-चाप-क्षेत्रस्य निर्माणस्य सम्भावना अस्ति इति। सः अवदत् यत् बुधवासरपर्यन्तं ओडिशा, आन्ध्रप्रदेश, पश्चिमबङ्गालस्य गङ्गानदीप्रदेशस्य च केषुचित् भागेषु वृष्टेः संभावना विद्यते ।

-----------------------------------------------

## नागालैण्ड्-गवर्नर् ओथ्ः

मणिपुर्-राज्यस्य राज्यपालः अजयकुमारभल्ला अद्य नागालैण्ड्-राज्यस्य द्वाविंशतितमः राज्यपालत्वेन शपथग्रहणं कृतवान्। कोहिमा-नगरस्य राजभवने गौहाटी-उच्चन्यायालयस्य मुख्यन्यायाधीशेन न्यायमूर्तिना आशुतोषकुमारेण तस्मै पदस्य गोपनीयतायाः शपथग्रहणं कारितम्। अगस्तमासस्य पञ्चदश- दिनाङ्के राज्यपालस्य ला गणेशनवर्यस्य मृत्योः अनन्तरं श्री भल्ला इत्यस्मै नागालैण्ड्-राज्यस्य अतिरिक्तः कार्यभारः प्रदत्तः आसीत्। शपथग्रहणसमारोहे मुख्यमन्त्री नेफियू रियो, उपमुख्यमन्त्री टी. आर. ज़ेलियाङ्ग्, वाई. पैटन्, संसत्सदस्याः, मन्त्रिणः, विधायकाः, वरिष्ठाधिकारिणः, पद्मश्रीपुरस्कार-विजेतारः, नागरिकसमाजसंगठनानां प्रतिनिधयः, अन्ये च गणमान्याः उपस्थिताः आसन्।

---------------------------------------------

## एस्.एस्.सी.

कर्मचारी-चयन-आयोगः अद्य पुनः उक्तवान् यत् आयोगः निष्पक्ष-पारदर्शिता युतं च परीक्षाणां सञ्चालनाय प्रतिबद्धः अस्ति इति। अद्य नवदिल्ल्यां वार्ताहरान् संबोधयन् एस्.एस्.सी. अध्यक्षः एस्. गोपालकृष्णन् वर्यः अवधानं दत्तवान् यत् आयोगः तान्त्रिक-दोषान् कदाचारान् च परिहर्तुं अनेकानि उपायानि अकरोत् इति। सः अवदत् यत् अस्मिन् वर्षे जुलाई-मासादारभ्य प्रथमवारं परिक्षार्थिनां सम्यक् परिचयाय आधारप्रमाणन इत्यस्य उपयोगः क्रियते।

---------------------------------------------

## वियतनाम्- झंझावात:

वियतनाम-देश: अस्य वर्षस्य शक्तियुतस्य झंझावातस्य कृते सज्जः अस्ति, देश: तावत् विमानस्थानकानि स्थगितवान्, विद्यालयान् पिहितवान्, सामूहिक-निष्कासनं च आरब्धवान्। वियतनाम-देशस्य ऋतुविभागेन उक्तं यत्, षष्ठ्यधिकैकशत-किलोमीटरमितं प्रतिहोरां यावत् वायुवेगेन युक्तः टैफून् काजिकी सोमवासरे अपराह्णे भूमौ प्रविशति। टैफून्-काजिकी इत्यस्य आगमनात् पूर्वं प्रायः षडाशीति-सहस्राधिक-पञ्चलक्षतोप्यधिकान् जनान् निष्कासयितुं सर्वकारः आदिष्टवान्।

---------------------------------------------

<u>भारोत्तोलनस्पर्धा</u>

गुजरातस्य अहमदाबादनगरे प्रवृत्तायां राष्ट्रमण्डल-भारोत्तोलन-प्रतिस्पर्धायां टोक्यो-ओलिम्पिक्-रजतपदकविजेत्री मीराबाईचानु इत्येषा अद्य महिलानाम् अष्टचत्त्वारिंशत्-किलोग्रामवर्गे त्रिनवत्यधिकैशत-परिमितं भारमुत्थाप्य स्वर्णपदकं विजितवती। अतः पूर्वं भारतेन द्वे स्वर्णपदके विजिते। महिलानां चतुश्चत्वारिंशतात्-ष्टचत्वारिंशत्किलोग्रामवर्गे प्रीतिस्मिता भोई इत्यनया पञ्चाशदधिकैकशतं भारं समुत्थापितम्। अपरत्र पुरुषवर्गे धर्मज्योति देवघरिया इत्यमुना चतुर्विंशत्यधिक-द्विशतमितं भारमुत्थाय विजयकिरीटं स्वायत्तीकृतम्।

।। इति वार्ता ।।